# Shri Vishnustavan by Markendeya in Narasimhapurana

# શ્રીવિષ્ણુસ્તવનં માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે

## Document Information

Text title : viShNustuti by mArkaNDeya from narasiMhapurANa

File name : viShNustutimArkaNDeyoktamNP.itx

Category : vishhnu, stotra, vishnu

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 10 verses 8-15

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Shri Vishnustavan by Markendeya in Narasimhapurana

# શ્રીવિષ્ણુસ્તવનં માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે

માર્કણ્ડેય ઉવાચ –

નરં નૃસિંહં નરનાથમચ્યુતં પ્રલમ્બબાહું કમલાયતેક્ષણમ્ ।
ક્ષિતીશ્વરૈરર્ચિતપાદપઙ્કજં નમામિ વિષ્ણું પુરુષં પુરાતનમ્ ॥ ૧॥

જગત્પતિં ક્ષીરસમુદ્રમન્દિરં તં શાર્ઙ્ગપાણિં મુનિવૃન્દવન્દિતમ્ ।
શ્રિયઃ પતિં શ્રીધરમીશમીશ્વરં નમામિ ગોવિન્દમનન્તવર્ચસમ્ ॥ ૨॥

અજં વરેણ્યં જનદુઃખનાશનં ગુરું પુરાણં પુરુષોત્તમં પ્રભુમ્ ।
સહસ્રસૂર્યદ્યુતિમન્તમચ્યુતં નમામિ ભક્ત્યા હરિમાદ્યમાધવમ્ ॥ ૩॥

પુરસ્કૃતં પુણ્યવતાં પરાં ગતિં ક્ષિતીશ્વરં લોકપતિં પ્રજાપતિમ્ ।
પરં પરાણામપિ કારણં હરિં નમામિ લોકત્રયકર્મસાક્ષિણમ્ ॥ ૪॥

ભોગે ત્વનન્તસ્ય પયોદધૌ સુરઃ પુરા હિ શેતે ભગવાનનાદિકૃત્ ।
ક્ષીરોદવીચીકણિકામ્બુનોક્ષિતં તં શ્રીનિવાસં પ્રણતોઽસ્મિ કેશવમ્ ॥ ૫॥

યો નારસિંહં વપુરાસ્થિતો મહાન્ સુરો મુરારિર્મધુકૈટભાન્તકૃત્ ।
સમસ્તલોકાર્તિહરં હિરણ્યકં નમામિ વિષ્ણું સતતં નમામિ તમ્ ॥ ૬॥

અનન્તમવ્યક્તમતીન્દ્રિયં વિભું સ્વે સ્વે હિ રૂપે સ્વયમેવ સંસ્થિતમ્ ।
યોગેશ્વરૈરેવ સદા નમસ્કૃતં નમામિ ભક્ત્યા સતતં જનાર્દનમ્ ॥ ૭॥

આનન્દમેકં વિરજં વિદાત્મકં વૃન્દાલયં યોગિભિરેવ પૂજિતમ્ ।
અણોરણીયાંસમવૃદ્ધિમક્ષયં નમામિ ભક્તપ્રિયમીશ્વરં હરિમ્ ॥ ૮॥

ઇતિ ।

અધ્યાય ૧૦ શ્લોક ૮-૧૫, અધ્યાય શ્લોક સંખ્યા ૫૨
શ્રીનરસિંહપુરાણે માર્કણ્ડેયચરિત્રે દશમોઽધ્યાયઃ ॥ ૧૦॥

From Narasimhapurana adhyAya 10. Selected verses.
https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

*Shri Vishnustavan by Markendeya in Narasimhapurana*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*